International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 38-42
© 2021 IJSR
www.anantaajournal.com
Received: 30-06-2021
Accepted: 31-08-2021

Dr. Arundhati Ojha
संस्कृतविभागाध्यक्षा धरणीधर स्वयंशासितमहाविद्यालयः, केन्दुझरम्, ओडिशा, भारत

Corresponding Author:
Dr. Arundhati Ojha
संस्कृतविभागाध्यक्षा धरणीधर स्वयंशासितमहाविद्यालयः, केन्दुझरम्, ओडिशा, भारत

# वैदिकयुगे नारीसंस्काराः

Dr. Arundhati Ojha

DOI: https://doi.org/10.22271/23947519.2021.v7.i5a.1469

## प्रस्तावना

भारतीय वाङ्मये यावन्ति शास्त्राणि दरीदृश्यन्ते तेषु सर्वेषु शास्त्रेषु मूलम् भवति भगवान् वेदः । स च वेदः भगवतः परं ब्रह्मण: निःश्वासभूत: अपौरुषेयश्च विद्यते । अयं वेद: ज्ञानराशि: सर्वज्ञानमय: सर्वस्मैः युक्तश्च परिप्रकाशित अस्ति ।समग्रेयं पृथिव्यां यावन्तविषया: उद्भासन्ते तेषां सर्वेषां विषयाणां समुल्लेखा: वेदे विराजते । भगवतः प्रपञ्चितेऽस्मिन् जगतितले नारी भवति अपूर्वसृष्टिः । सा जाया, जननी, भगिनीरूपेण प्रतिपादितास्ति । परन्तु मनुष्यः संस्कारद्वारा यथामार्जित: सुसंस्कृत: शिक्षितः सुसभ्यश्च भवति तथैव इयं नारी संस्कारेण वलेन सुशिक्षिता, सुसभ्या, सुसंस्कृता तु जायते । परन्तु केषुचित् संस्कारेषु तस्याः अधिकार: कुत्रवा तस्या: अनधिकार: तन्मया अत्र प्रबन्धे उपस्थाप्यते ।

## वैदिकसाहित्यस्य संक्षिप्त परिचय

विश्वसाहित्यस्य प्राचीनतमा: ग्रन्थाः वेदा: सन्ति । संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते । अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेद: सर्वेभ्यः प्राचीनतम इति सर्वैरेव अङ्गीक्रियते । वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम् स्मृत्यादयस्तु तन्मूलकतया । श्रुतिस्मृत्योविरोधे श्रुतिरेव गरीयसी । न केवलं धर्ममूलतयैव वेदा: समादृताः, अपितु विश्वेऽस्मिन् सर्वप्राचीनग्रन्थतयाऽपि । प्राचीनानि धर्मसमाज व्यवहार-प्रभृतीति वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते । प्रधानतया वेदो द्विविध: मन्त्ररूपो ब्राह्मणरूपश्च । तथा च-संहिता, ब्राह्मण, आरण्यक, उपनिषद् इति वेदस्य चत्वारो विभागा: विद्यन्ते । वेदशब्देन मुख्यत: ऋग्यजु:सामाथर्वनामभिः गम्यते । ऋग्वेदे - धारणार्थे पालनार्थे च पुलिङ्गे एव प्रयुक्तः । यजुर्वेदे धारणार्थे धारकार्थे च प्रयुक्तः । सामवेदे गीयते । अथर्ववेदे धार्मिकक्रियाजनितगुणार्थे दृश्यते । भगवता पतञ्जलिना महाभाष्ये पस्पशाह्निके प्रतिपादितमस्ति यत् “चत्वारो वेदाः साङ्गा: सरहस्या: बहुधा भिन्ना, एकशतम् अध्वर्युशाखा:, सहस्रवर्त्मा सामवेदः, एकविंशतिधा ब्राह्वृच्यम्, नवधा अथर्वणो वेदः ।"

संस्कारशब्द: वैदिकसाहित्यादारभ्य आधुनिकसाहित्यं यावत् सर्वत्र प्रतिपादितो दृश्यते । यज्ञपात्राणां संस्कार: यजनसंस्कार: यज्ञसंस्कार: आत्मसंस्कार: स्नानसंस्कारश्चेति । एवं कतिपयविषयाः वैदिकग्रन्थेषु आलोच्यन्ते । ऋग्वेदे संस्कारशब्द: सामान्यत इष्टप्राप्त्यर्थं प्रयुक्तो वर्तते ।

## संस्काराणां नामानि

शास्त्रकारैः बहुविधा: संस्कारा: कथिता: सन्ति। ते च संस्कारा: स्मृत्यनुसारं धर्मशास्त्रनिबन्धग्रन्थानुसारं च भिद्यन्ते । शास्त्रीयदृष्ट्या संस्कारा गृह्यसूत्राणां विषयपरिसरे तिष्ठन्ति ।

**प्राग्जन्मसंस्कारा :-** प्राग्जन्मसंस्कारे मुख्यत: संस्कारत्रयमन्त्रर्भवति । १) गर्भाधान संस्कारः । २) पुंसवनसंस्कारः,३) सीमन्तोन्नयनसंस्कारश्च ।

**शैशवसंस्कारा :-** नवजातशिशो: स्त्रियाश्च रक्षणावेक्षणार्थं मानवै: विधिविधानानि पाल्यन्ते । शैशवसंस्कारे षड्विधसंस्कारा अन्तर्भवति। १) जातकर्मसंस्कार: २) नामकरणसंस्कारः, ३) निष्क्रमणसंस्कारः, ४) अन्नप्राशनसंस्कारः, ५) चूडाकरणसंस्कारः, ६) कर्णवेधसंस्कारः ।

**शैक्षणिकसंस्कार :-** संस्कारेण मनुष्य: पुनर्जन्म न लभते। मातृगर्भात् जन्मापेक्षयाऽस्य जन्मन: गुरुत्वं सर्वाधिकम्। शैक्षणिकसंस्कारेषु संस्कारचतुष्टयमन्तर्भवति। १) उपनयनसंस्कारः, २) वेदारम्भसंस्कारः, ३) केशान्तसंस्कारः, ४) समावर्त्तनसंस्कारश्च ।

**विवाहसंस्कार :-** संस्कारेषु विवाहसंस्कारस्य महत्त्वं सर्वाधिकं विद्यते। १) विवाहप्रकाराः, २) विवाहकाल:, ३) विवाहसंस्कार कन्यागुणा:, ४) विवाहसंस्कारे वरगुणाः, ५) विधिविधानम्, ६) विवाहसंस्कारस्य प्रतीकम् ।

**अन्त्येष्टिसंस्कार :-** हिन्दुजीवनस्यान्तिमसंस्कारो भवति अन्त्येष्टिः। अस्मात् संसारात् प्रस्थानानन्तरं परलोक गतिं सम्यक् विचिन्त्यायमन्तिमसंस्कार: क्रियते ।

## संस्कारेषु नारीणां अंशग्रहणम्

भारतीयसंस्कृतौ नारी लक्ष्मीस्वरूपा तथा अतीव पूजनीया भवति । भारतदेशस्य सभ्यतायाः संस्कृत्याश्च मूल्याङ्कनं नारीवर्गदृष्ट्वा एव क्रियते । नारी एव समाजस्य आधारशिला विद्यते । भारतवर्षे वैदिककाले स्मृतिकाले रामायणमहाभारतादिकाले च नारीणां स्थिति: अतीव गौरवमयी आसीत् ।

## सम्राज्ञी श्वशुरे भवः (ऋग्वेद)[1]

सा श्वशुरश्वश्रवीश्च नियन्त्री आसीत् । विंशतिशताब्दीया स्त्री-स्वातन्त्र्यस्य स्वायत्तत्तायाश्च आन्दोलनं प्रारब्धवती । एतस्य आन्दोलनस्य मुख्यप्रवर्तका: कविगुरुरवीन्द्रनाथठाकुरः, विद्यासागरः, स्वामीदयानन्द: सरस्वती, महात्मागान्धी राजाराममोहनराय प्रभृतयः सन्ति। स्त्रियः सुशिक्षिताः स्युः, समाजे तासां सम्मानजनकस्थानं भवेत् । नारी गृहकार्येषु, बाह्यकार्येष शिक्षाक्षेत्रे, सुरक्षाक्षेत्रे, चिकित्साक्षेत्रे, शिक्षणकार्ये, प्रसाधनकार्येषु अभिनयक्षेत्रे च नार्यो विशेषरुपेण अधिकं साफल्यं लभन्ते । मनुस्मृतावप्युक्तम् "यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः ।"[2]

ऋग्वेदे नारीशब्दस्य प्रयोग: न दृश्यते, परन्तु यज्ञस्य अर्थ: 'नार्य' इति प्रयोग: दृश्यते । तत्र नारी मेना इति कथ्यते । हिमालयस्य पत्नी तथा पार्वत्या मातुर्नाम मेना आसीत् । इतोऽपि स्त्रीशब्दो नारीणामधिको प्रचलितो भवति। उक्तं च निरुक्तकारेण –

**"स्त्रिय: स्तायते अपत्यवय कर्मणः ।"**

## विवाहसंस्कारे नारीणां प्रामुख्यम् –

वैदिककाले कर्मकाण्डविधिविधानेन सह संस्कारस्य सम्बन्ध: विद्यते। ऋग्वेदे[1] अथर्ववेदे,[2] चास्य स्पष्टाभिव्यक्ति: प्राप्यते । गृहस्य मधुरता स्नेहमयवातावरणस्य तथा पत्न्या साकं वैवाहिकप्रेममयजीवनस्य फलस्वरूपं सन्तानजननं तस्य पालनं पोषणं च मानवस्य कर्तव्यम्। तैत्तिरीयब्राह्मणे कथ्यते –

**"अयज्ञियो वा एष योऽपत्नीकः, अथो ।**
**अर्द्धो वा एष आत्मनः यत् पत्नी ।।"**[3]

प्राचीनकालेऽपि विवाहस्य आदर: दृश्यते । मानवस्य विकाशाय पशुपालन-कृषि-वाणिज्यादीनामुन्नतये मूलकारणं भवति विवाहः । हिन्दुधर्मे आर्थिक-सामाजिक कारणानामपेक्षया विवाहः श्रेष्ठः सर्वाधिक: महत्त्वपूर्णश्च भवन्ति। भारते एव विवाहः श्रेष्ठस्थानं प्राप्नोति ।

विवाहशब्दो[4] वह प्रापण इत्यस्माद् धातोर्भावे घञि कृते वाहो विवाह इति व्युत्पत्त्या निष्पद्यते । वैशिष्ट्यं च प्रतिग्रहाद्यष्टविधोपायेष्वन्यतमोपायेन स्वीकृतायां होमादिसप्तमपदनयनान्तकर्मभिसंस्कृतत्वात्, तथा च –

**विवाहपदार्थे अर्थद्वये सिध्यति,**
**स्वप्नोत्पादनं संस्काराधानं चेति ।**

**विवाहप्रकाराः**

गृह्यसूत्रकाराः स्मृतिकारश्च विवाहप्रकारान् प्रदर्शयन्ति । तेषु वैखानसगृह्यसूत्रे १) उक्तम् -

**"अथात: पाणिग्रहणम् ।**[5]

अष्टौ विवाहा: भवन्ति ब्राह्मो दैव: प्राजापत्य: आर्ष आसुरी गान्धर्वो राक्षस: पैशाच इति ।

**ब्राह्मविवाहः -** अष्टविधविवाहेषु ब्राह्मविवाह: मुख्य: श्रेष्ठश्च । एतेन विवाहेन मनुष्य: दशपूर्वपुरुषान् दशपरपुरुषानपि तारयात इति धर्मशास्त्रकारा: निगदन्ति । मनुस्मृतौ

**आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् ।**
**आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥**[6]

तत्रादौ प्रतिपादितमाश्वलायनगृह्यसूत्रे -

**अलंकृत्य कन्यामुदकपूर्वां दद्यदेष ब्राह्मो विवाहः ।**[7]

**दैवविवाह**

ऋत्विजे श्रौतकर्मानुष्ठानतत्पराय यदा सुवर्णादिभि: विविधैः प्रकारैः कन्याऽलंकृत्य समर्प्यते तदानीं दैवविवाहो भवतीति स्मृतिधर्मसूत्रकाराणामभिप्रायः ।

मनुस्मृति:

**यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ।**
**अलंकृत्य सुतादानं दैवं धर्म प्रचक्षते ।।**[8]

**आर्षविवाह**

आर्षविवाहे गोमिथुनमेकं गोमिथुनद्वयं वा कन्यापक्षाय वर: प्रदाय कन्याग्रहणं कुर्याद् । यथा – मनुनोक्तं -

**एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।**
**कन्याप्रदानं विधिवदार्षो धर्मोऽयमुच्यते ।।**
**आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।**
**अल्पो वाऽपि महान् वाऽपि विक्रयस्तावदेव सः ।।**[9]

**प्राजापत्यविवाह**

विवाहेऽस्मिन् कन्यापिता कन्यां सम्यगलंकृत्य वरं संप्रार्थ्य वरसमीपमागत्य कन्यार्पणं कुर्यात् ।

यथाह मनुः

**"सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य च ।**
**कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ।।**[10]

**आसुरविवाह** :- कन्यापित्रे भ्रात्रे मात्रेऽथवा कन्या अभिभावकेभ्य: ज्ञातिभ्यो वा यथेष्टं धनादिकं प्रयच्छन् कन्यायै धनप्रलोभनं च प्रदर्शयन् यदि कन्याग्रहणं क्रियते । तदानीमासुरविवाहो भवतीति धर्मशास्त्रकाराणां मतम् । मनुना उक्तं -

**"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।**
**कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ।।**
**न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि**
**गृह्णञ्छुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयो ।।"**[11]

**गान्धर्वविवाह :-** अस्मिन् विवाहे कन्यावरयोरिच्छाया: संयोगो भवति । मनु:

**इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।**
**गान्धर्वः स तु विज्ञेयो मैथुन्य: कामसम्भवः ।।**[12]

**राक्षसविवाह :-** यत्र कन्याया: हरणं वरेण वरपक्षीयेण वा बलपूकं क्रियते। तदा राक्षसविवाह: सम्पद्यते । मनुना –

**हत्वा छित्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ।**
**प्रसह्य कन्याहरणं राक्षसी विधिरुच्यते ।।**[13]

**पैशाचविवाह :-** यदा सुप्तावस्थायां मदोन्मत्तावस्थायां, प्रमत्तावस्थायां वा निर्जनेस्थाने त्रात्रौ वा कन्याहरणं कृत्वा विवाहः क्रियते । तदा पैशाचविवाहः सम्पद्यते । मनुरपि -

**"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।**
**स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः ।।**[14]

**विवाहकाल :-** विवाहे प्रथमत: कालविषय एव विचारणीयो भवति। तत्रापि वर्णः, कुलं च आश्रित्य वरकन्ययोः काल:

विचार्यते। सन्तानोत्पादनाय विवाहः क्रियते इति शास्त्रोक्तिः । पाणिग्रहणं सहवासश्च वैदिकविवाहस्यानिवार्यमङ्गद्वयम् । लापता कन्यायाः रजोदर्शनात्पूर्वं विवाहं कारयेत् । ऋग्वेदे कन्यायाः विवाहः यौवनप्राप्त्यनन्तरमभूत । सूर्यपुत्र्याः सूर्यायाः विवाहः यौवनप्राप्त्यनन्तरमभूत् । यौवनकाले स्त्रीपुरुषौ बहुविधप्रेम्णाऽभिसारं कुरुत इति ऋग्वेदऽथर्ववेदे[15] दृश्यते ।

गृह्यसूत्रेऽपि कन्यायाः विवाहव्यवस्था रजोदर्शनादनन्तरमिति सूचितम् ।

विवाहसंस्कारे कन्यागुणाः - वध्वा आयुर्विचारानन्तरं तस्याः व्यक्तिगतविषयेऽपि ध्यानं दीयते । शतपथब्राह्मणे एकं वर्णनामस्ति ।

**"सा स्त्री पृथुश्रोणिर्विमृष्टान्तरा क्षीणकटियुक्ता इति ।"**[16]

गृह्यसूत्रेष्वपि अस्य वर्णना प्राप्यते ।

स्मृतिकाराः कन्यायाः बाह्यलक्षणानि प्रतिपादितवन्तः । मनुमतेन पुरुषः शारीरिकदोषयुक्तः सुन्दरसौम्यनाम्नी हंसवारणगामिनीमुत्तमकेशयुक्तां समुचितलोमदन्तयुक्तां कोमलङ्गी च स्त्रियमुद्वहेत । याज्ञवल्क्यानुसारम् 'अनन्यापूर्विकां कान्ताम' इति यवीयसी च कन्यामुद्वहेत् ।

**अव्यङ्गाङ्गी सौम्यनाम्नी हंसवारणगामिनीम् ।**
**तनुलोमकेशवदना मृद्वङ्गीमुहेद्वहेत् स्त्रियम् ।। मनु ३/१०**

केषाञ्चन शारीरिकगुणानां हेतोऽपि कन्या वर्जनीया भवति । यथा मनु[17] कथयति - कपिलकेशामधिकाङ्गयुक्तां रोगिणीं, लोमहीनां, वाचालां, पिङ्गलवर्णयुक्तां कन्यां न गृह्णीयात् । वध्वाः अन्तिमः महत्वपूर्ण तत्त्वंभवति तस्याः जननक्षमता ।

## विवाहसंस्कारे वरगुणा

वरस्य गुणपरिसरः बहुव्यापकः। याज्ञवल्क्यवचनानुसारमुपकुर्वाणकः ब्रह्मचारी ब्रह्मचर्य समाप्य गुरोराज्ञया गृहं प्रत्यावर्त्तनं कृत्वा गृहस्थाश्रम प्रविशेत् । आपस्तम्बेऽपि –

**"बन्धुशीललक्षणसम्पन्नः श्रुतवानरोगः ।**[18]

यमोऽपि सर्वगुणातिरिक्तं सप्तगुणान् परीक्ष्य कन्यादानं कर्त्तव्यमिति कथयति । यथा स्त्रियाः जननसामर्थ्य परीक्ष्य पुरुषः कन्याग्रहणं कुर्यात् । तथा- पुरुषस्य पौरुषत्वं सम्यक् परीक्ष्यं स्त्रिया विवाहः कर्त्तव्यः ।

हिन्दुसमाजे द्वितीयपत्नीं ग्रहणं क्रियते तदपि यस्मिन् समये तस्य प्रथम पत्नी मृता पतिता वा स्यात् ।

कुमारं वरं प्रति कन्यादानं सर्वोत्तमं श्रेष्ठं च । दोषयुक्तः वरः सर्वदा वर्जनीयः । कुशलशीलविहीनाय नपुंसकपतितकुष्ठादि -रोगपीडिताय विधर्मोचिररुगणच्छझ-वेशधारकाय कन्या न देया ।

शास्त्रीयविधिविधानानुसारं पुरुषः तथा ब्रह्मचारी नाग्निकां कन्यामुद्वहेत ।

## विधिविधानम्

1. **मौलिकनियम :-** वधूवरयोः निर्दिष्टगुणवयोवस्याधारेण विवाहसम्बन्धि-विधिविधानमासीत् । स्त्रीपुंमासों नियमानुसारेण दम्पत्तिरुपेण परिगणितौ स्याताम् ।

   परवर्त्तिसिद्धान्तः - विवाह सामुदायिकजीवनस्य हर्षानन्दभोजनसङ्गीनृत्यादीनां घटनानां प्रतीकस्वरुपम् ।

## वैदिककालीनसिद्धान्त

प्राग्वैदिककाले वैवाहिकविधिविधानं नासीत् । ऋग्वेदे कुलानुसारं विवाहक्रिया दृश्यते। सोमेन साकं सूर्यपुत्री सुरी विवाहं करोति । अथर्ववेदस्य वैवाहिकक्रियायाः क्रमः ययारीत्याः प्रतिपादितो भवति ।

**सूत्रकाल :-** सूत्रकाले कर्मकाण्डविधिः क्रमवद्धः दृश्यते । विवाहसम्बन्धीनां संस्काराणां गृह्यसूत्रे विधिवत् परिपालनायोल्लेखोऽस्ति ।[19]

कालक्रमे धार्मिकविचारधारा सामाजिकव्यवस्था क्रियाविधिविधानानां च परिवर्त्तनं भवति ।

## विवाहसंस्कारस्य प्रतीकम् -

एकवस्तुदर्शनेन स्मरणेन च वारं वारं यत् स्मरति तस्य नाम प्रतीकमिति। स प्रतीकः स्वयं प्रकटितो न भवति । कस्यापि साहाय्येन परिप्रकाश्यते ।

स्मार्त्तधर्मे विवाहसंस्कारः उपर्युक्तविधिविधानेनानुष्ठितो भवति । विवाहस्य तात्पर्यं भवति वरवध्वौ मिलितौ सन्तौ निगूढं सम्बन्धमतिमानवमाध्यात्मिकं दैवीतत्त्व च विकशितो कुर्वतः । हिन्दुविवाहस्य रहस्यात्मकतत्त्वे

प्रतीकस्य अतीवावश्यकता विद्यते । हिन्दुविवाहे योग्यतामयोः स्त्रीपुरुषयो: मध्ये वैधानिकसम्बन वैवाहिकविधिविधाने सर्वाधिक महत्त्वं विद्यते । तच्च नवदम्पतीमध्ये नवीनं सम्बन्धं स्थापयति । विवाह एक: स्थायी सम्बन्धो भवति । विवाहस्य मुख्यमुद्देश्यं भवति सन्तानजननं धर्मरक्षणं च । विवाह: मनुष्यजीवनस्य सर्वाधिकं स्वागतयोग्य: पदक्षेपः । य: विधि: मनुष्यजीवने नूतनाध्यायस्य प्रारम्भं करोति नूतनं सम्बन्धं च स्थापयति । सम्बन्धस्थापने बहुविधा आशा आकाङ्क्षाश्च जाग्रताः भवन्ति ।
अनेन प्रकारेण वैवाहिकप्रतीकवादस्य साधारणप्रयोजनं वैवाहिकजीवनं व्याप्नोति । शास्त्रीयं महत्त्वं, दाम्पत्त्यजीवनस्य दैहिकं तथा मानसिकमेकीकरणं मधममार्गानुसारणं, सामाजिकपरिवर्त्तनं च हिन्दुविवाहविधे: प्रमुखचिह्नानि भवन्ति ।

## पादटिप्पणी

1. ऋग्वेद १०/८५/४६
2. मनु.३/५६
3. ऋग्वेदे १०/८५
4. अथर्ववेदे १४/१/२
5. तैत्तिरीयब्राह्मणे, २/२/२-६,२/९/४-७
6. सं.प्र.पृ.- ५८३-५८६
7. वै.गृ. ३/२
8. मनु. ३/२७
9. अश्वा.गृ.१/६/१
10. मनु. ३/२८
11. मनु. ३/२९,४१
12. मनु. ३/३० गृ.क.पृ.-८४-८५
13. मनु. ३/३१.५१
14. मनु. ३/३२, स्मृ.च.सं., पृ.-८३, गृ.र.पृ.-७५
15. मनु. ३/३३
16. मनु. ३/३४
17. ऋ.वे.१०/१४५,अ. ३/१८/२, ३/३०/२, ३/३६/३
18. एवमिव हि योषां प्रशंसन्ति पृथुश्रोणिर्विमृष्टान्तरा सा मध्ये संग्राह्येति । शत.ब्रा.१/२/५-१३
19. मनु.३/८-९
20. आप.ध. १/३/२०
21. शौ.गृ.सू. १/५, आश्व.गृ.सू. १/५, पा.गृ.सू. १/४/८, गौ.गृ.सू.-२/१, हा.गृ.सू.१/१९, भा.गृ.सू. १/११-२०